# वाक्यपदीये अपभ्रंशविमर्शः

डॉ. अभिजित् घोषः

सारांशः– शोधनिबन्धेऽस्मिन् समासेन ब्रह्मणः शब्दरूपत्वं यथामति निरुपितम्। ततश्च चिकित्साशास्त्रस्य अध्यात्मशास्त्रस्य च अपाकरणं प्रदर्श्य व्याकरणशास्त्रस्य परमप्रयोजनमुल्लिखितम्। एवं कथम्भूताः इमे अपभ्रंशा इत्याशङ्क्य अपभ्रंशस्वरूपं प्रकटितम्। इह "प्रकृतिः संस्कृतं, तस्माज्जातं प्राकृतमिति" प्राकृतविदुषः हेमचन्द्राचार्यस्य मतं नाङ्गीक्रियते आचार्येण भर्तृहरिणा सङ्ग्रहकारेण च। इत्थं कथं वा अपभ्रंशानां वाचकत्वं साधुत्वमिति पूर्वपक्षिणां स्वाभिप्रायं विश्लेष्य आचार्यसिद्धान्तः चर्चितः। आचार्यस्य भर्तृहरेः सिद्धान्तस्तावत्- साधुशब्दानाम् अपभ्रंशानां च वाचकत्वे समानत्वेऽपि शास्त्रेण साधुशब्दापशब्दप्रयोगेषु कश्चिद् नियमः विधीयते। तद्यथा–

"असाधुरनुमानेन वाचकः कैश्चिदिष्यते।
वाचकत्वाविशेषे वा नियमः पुण्यपापयोः"[1]।। इति

एवं हि साधुशब्दप्रयोगे पुण्यम्, असाधुशब्दप्रयोगे पापं पुण्याभाव वेति।
हरिकारिकाः अनुसृत्य शोधनिबन्धोऽयं रचितः वर्तते। अनया रीत्या "वाक्यपदीये अपभ्रंशविमर्शः" विषयोऽयं समासेन यथामति प्रतिपादितः, विशेषस्तु शोधनिबन्धे इति शिवम्।

कूटशब्दाः– वाक्यपदीयं, भर्तृहरिः, अपभ्रंशः, कारिका, व्याकरणं, शब्दश्चेति।

प्रस्तावना– व्याकरणदर्शनप्रदिपादकेषु आचार्येषु प्रमुखोऽस्ति पदवाक्यप्रमाणज्ञः आचार्यः भर्तृहरिः। संस्कृतवाङ्मये 'वाक्यपदीयम्' इति तस्य महती कृतिः। तत्र सिद्धान्तितं 'शब्दतत्त्वमेव ब्रह्मतत्त्वम्'। निगदितं चाचार्येण ग्रन्थारम्भे–

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"[2]।। इति

अर्थात् जगन्निदानं स्फोटाख्यो निरवयवो नित्यः शब्दो ब्रह्मैवेति।

यथा चिकित्साशास्त्रेण शरीरविषयदोषरागाः, अध्यात्मशास्त्रेण च बुद्धिदोषाः अपाक्रियन्ते। तथैव लक्षणशास्त्रेण व्याकरणेन वा वाणीविषयदोषाः शुद्धिक्रियन्ते। उक्तं च हरिकारिकायाम्–

"कायवाग्बुद्धिविषया ये मलाः समवस्थिताः।
चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः"[3]।। इति

व्याकरणशास्त्रं तु बुद्धिदोषानप्यपाकृत्यापवर्गसाधनमपि भवति। तदुक्तं च भर्तृहरिणा–

"तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते"[4]।। इति

अपभ्रंशस्वरूपम्- अपभ्रंशरूपाणां वाग्दोषाणां विशुद्ध्यर्थमिदं पदशास्त्रम्। भगवता भाष्यकारेणाऽपि व्याकरणशास्त्रस्य साक्षात्प्रयोजनमुक्तम्– "अथ शब्दानुशासनम्"[5] इति। 'अपशब्देभ्यो विविच्य ज्ञाप्यन्ते साधुशब्दाः अनेन तत् अनुशासनं, शब्दानाम् अनुशासनं शब्दानुशसनमिति। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्। कथंभूताः इमे अपभ्रंशाः इत्याकाङ्क्षायाम् अपभ्रंशलक्षणमुवाच भर्तृहरिः। उक्तञ्च कारिकायाम्–

"शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते।
तमपभ्रंमिच्छन्ति विशिष्टार्थनिवेशनम्"[6]।। इति

गोरिति प्रयोक्तुम् ईप्सिते यः साधुत्वसंस्कारहरितः शब्दः प्रयुज्यते, विशिष्टार्थनिवेशनं तम् 'अपभ्रंशम्' इच्छन्ति, तथाभूतः शब्दः इति विदुषामाशयः। श्रीवृषभाचार्यः 'संस्कारहीनः' इत्यस्मिन् स्थाने आह– "व्याकरणविहितेन प्रकृतिप्रत्ययादिविभागेनायुक्तः" इति। गोरिति सास्नादिमति पशुविशेषेऽर्थे प्रसिद्धोऽयं साधुशब्दः। तत्र 'गोणी' इति शब्दः यदि पशुविशेषे अर्थे अशक्त्या प्रमादाद्वा प्रयुज्यते तदा सोऽयं 'गोणी' शब्दः अपभ्रंशः इत्यभिधीयते। यतो न हि गोणीत्यस्य पशुविशेषे अर्थे साधुत्वेन प्रसिद्धिरिति। परन्तु अर्थान्तरे न तथा। यदि गोणीशब्दः आवपनेऽर्थे प्रयुज्यते तदा न अपभ्रंशः, किमर्थमिति चेत् गोणीत्यस्य आवपनेऽर्थे साधुत्वेन प्रसिद्धत्वात्। तथैव गावीति सास्नावत्सिकयोः प्रयुत्यमानं साधुः। अतएव न हि केवलं स्वरूपमात्रमधिकृत्य शब्दानां साधुत्वासाधुत्वव्यवस्थापकम्।

संग्रहकारस्य मतम्- अपभ्रंशविषये अस्ति तावत् त्रीणि मतानि। तत्र

'शब्दप्रकृतिरपभ्रंशः' इति संग्रहकारः, अर्थात् साधुशब्दः प्रकतिः मूलं यस्य स भवति अपभ्रंशः। सत्यमस्ति यद् न हि प्रकृतिरहितोऽपभ्रंशो नाम कश्चित् स्वतन्त्र एव शब्दो विद्यते। अतः समेषाम् अपभ्रंशानां प्रकृतिः साधुशब्द एव। क्वचिद् प्रसिद्धिहेतोः रूढितामापद्यमानाः केचिदपभ्रंशाः स्वातन्त्र्यमेव लभन्ते। तद्यथा गोरिति सास्नादिमति पशुविशेषेऽर्थे प्रसिद्धोऽयं साधुशब्दः। तत्र 'गोणी' इति शब्दः यदि पशुविशेषे अर्थे अशक्त्या प्रमादाद्वा प्रयुज्यते तदा सोऽयं 'गोणी' शब्दः अपभ्रंशः इत्यभिधीयते। यतो न हि गोणीत्यस्य पशुविशेषे अर्थे साधुत्वेन प्रसिद्धिरिति। परन्तु अर्थान्तरे न तथा । यदि गोणीशब्दः आवपनेऽर्थे प्रयुज्यते तदा न अपभ्रंशः, किमर्थमिति चेत् गोणीत्यस्य आवपनेऽर्थे साधुत्वेन प्रसिद्धत्वात्। तथैव गावीति सास्नावत्सिकयोः प्रयुत्यमानं साधुः। अतएव च न हि केवलं स्वरूपमात्रमधिकृत्य शब्दानां साधुत्वासाधुत्वव्यवस्थापकम्।

प्राकृतभाषायाः परमविदुषा हेमचन्द्राचार्येण प्रोक्तं- "प्रकृतिः संस्कृतं, तस्माज्जातं प्राकृतमिति"। तन्मते तु प्राकृतं हि साधुशब्दानां मूलं, किञ्च 'शब्दप्रकृतिः' इत्यत्र तत्पुरुषसमासः। यथा शब्दानां साधुशब्दानां प्रकृतिः मूलम् अपभ्रंशः। परन्तु हेमचन्द्राचार्यस्य मतमिदं भर्तृहरेः संग्रहकारस्य व्याडेश्च नेष्टम्।

अपभ्रंशानां साधुत्वम्- प्रवृत्तिनिमित्तमूलकं साधुत्वं न तु वर्णानुपूर्वो मूलकमिति जिज्ञासायां भर्तृहरिः स्वकारिकया समाधानमूचे-

"अस्व-गोण्यादयः शब्दाः साधवो विषयान्तरे।
निमित्तभेदात् सर्वत्र साधुत्वं च व्यवस्थितम्"[7]।। इति

अस्वश्च गोणी च अस्वगोण्यौ तौ आदी येषां ते अस्वगोण्यादयः शब्दाः अर्थान्तरेषु साधवः भवन्ति। यथा– निर्धने अर्थे अस्वशब्दः, तथैव गोः भिन्ने आवपने अर्थे गोणीशब्दश्च साधू भवतः, न तु अश्वे गवि चार्थे। एवमन्यपि अन्यार्थे साधवः सन्ति। उक्तं च अमरकोषटीकाकर्त्रा कृष्णमित्रेण– "प्रस्थचतुष्टयमाढकः। एवं द्रोणो गोणी खारीति यथोत्तरचतुर्गुणाः। गोण्येव भारस्चतुष्टयं वाहः" इति। क्षीरस्वामिनाऽपि प्रोक्तं– "द्विशूर्पा गोण्युदाहृता"। प्रसङ्गेऽस्मिन् "यस्तु प्रयुङ्क्ते कुशलो विशेषे"[8] इति भाष्योक्तेः व्याख्यानावसरे महाभाष्यदीपिकायाम् आचार्येण भर्तृहरिणा कथितं– "स एव शब्दोऽर्थविषेशे कस्मिंश्चिदसाधुरित्येतदाख्यायते। यथा गोणीशब्दः

सास्नादिमत्यसाधुः। तथाश्वशब्दः केसरादिमति साधुः। न निःस्व इति। अस्व इति निर्धने साधुः नैकशफादिलक्षणे। यदि गोणीशब्दोऽपि निमित्तान्तराद् सास्नादिमति प्रयुज्यत गोणीव गोणीति साधुरेव स्यात्। अश्वे वा अश्वशब्दं धनाभावाद्वारकं प्रयुञ्जीत स साधुरेव"[9] इति। इत्थं च साधुत्वं सर्वत्र शब्देषु, निमित्तभेदात् प्रवृत्तिनिमित्तभेदात् व्युत्पत्तिनिमित्तभेदाच्च व्यवस्थितं वरीवर्ति। यतो हि प्रवृत्तेः व्युत्पत्तेश्च निमित्तमादय शब्दानां साधुत्वमसाधुत्वं निश्चेतुं शक्यते। तस्मात् शब्दानां साधुत्वासाधुत्वनिरूपणे 'वर्णानुपूर्वी मूलकमितीयं जिज्ञासा' न कर्तव्या।

अपभ्रंशेभ्यो अर्थबोधः- "तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशनम्" इत्यनया कारिकया अपभ्रंशानामर्थवाचकत्वं प्रतिपादितमेव तथापि कथं वा 'अपभ्रंशेभ्योऽर्थबोधप्रकारः' इति जिज्ञासायां कारिका प्रोक्ता भर्तृहरिणा–

"ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।

तादात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशकाः"[10]।। इति

साधुशब्दार्थेषु प्रयुज्यमानाः गाव्यादयः अपभ्रंशशब्दाः अर्थबोधे न स्वतन्त्राः शक्त्याभावात्। परन्तु लोके शास्त्रे चापभ्रंशानाम् अर्थबोधस्तु जायते। तत्र अर्थबोधे किमस्ति मानमिति चेत् अनुमानम् साधुशब्दविषयकस्मरणं वेति। अर्थात् अनुमानद्वारा साधुशब्दस्मृत्या वा अपभ्रंशानाम् अर्थावबोधकारणानि भवन्ति। यथा वक्ता शब्दप्रयोगस्थले क्वचिद् नेत्रसङ्कोचं मुखव्यादानं वा दृष्ट्वा पीडितोऽयं, प्रसन्नोऽयम् इति प्रसङ्गानुसारेण अर्थबोधं कारयति। इह नेत्रसङ्केतादिषु शब्दाभावेऽपि वक्तु आशयः सुतराम् अवगम्यते। इयमेव स्थितिः अपभ्रंशेष्वपि। यथा गोणी इति प्रयुक्ते सति प्रसङ्गानुसारेण गोरिति प्रतीतिर्जायते। अत्र अर्थबोधस्तु साधुशब्दस्मरणेन एव।

इयं प्रतीतिः द्विधा जायते, अनुमानेन तादात्म्येन च । अपभ्रंशाः साधुशब्दतादात्म्यमुपगम्य शब्दार्थस्य प्रकाशकाः भवन्ति। यथा– गोरिति प्रयोक्तव्ये केनचित् प्रमादेन गावीति प्रयुक्तं ततः ग्रहणधारणपटुर्बालः गोपदस्मृत्या गोविषयकः बोधः जायते। ततः पार्श्वस्थः बालकः 'गावीशब्दादेवास्य बोधः जातः' इति भ्रान्तः सन्, तेन गावीशब्दस्य गोरूपेऽर्थे तादात्म्याभावेऽपि तादात्म्यमुपगम्य गावीशब्दादेव साक्षाद् अर्थबोधः क्रियते। स्पष्टं चेदं "ततशक्तिश्चानुरूपत्वात्" इति मीमांसासूत्रभाष्ये।

एवम् अपभ्रंशाः साक्षाद् न वाचकाः इति तार्किकाभिप्रायं विवेचयन्तः वैयाकरणाः प्राहुः– 'ननु साक्षादेवापभ्रंशानां कुतो न वाचकत्वमिति'। उक्तञ्च हरिकारिकायाम्–

"न शिष्टैरनुगम्यन्ते पर्याया इव साधवः।
ते यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः"[11]।। इति

यतः शिष्टैः विज्ञैः वा समानार्थाः साधुशब्दा इव ते अपभ्रंशाः व्याकरणस्मृतिसूत्रेण न उपादीयन्ते। तस्मात् अपभ्रंशाः साक्षात् अवाचका इत्यर्थः। एवञ्च गोशब्दस्य माहेयी-सुरभ्यादय एव पर्यायाः न तु गाव्यादयः। यश्च प्रत्यक्षेण प्रयोजकेष्वभिधेयेषु प्रवर्तते स साधुः। तत्तु साक्षात् साधुशब्दैः प्रत्याय्यते। ततश्च साधुशब्देभ्यो सुतरां वाच्यवाचकसम्बन्धः जायते, परन्तु अपभ्रंशानां साक्षादवाचकत्वाद् अनुमानाश्रयत्वाच्च साधुत्वं नैव सिद्धम्। अतः साधुत्वाभावात् शिष्टैः अपभ्रंशाः न प्रयुज्यन्ते। उक्तं च भर्तृहरिणा त्रिपदीटीकायां "शिष्टप्रयोगमभिसमीक्ष्य प्रकृतिरूहितव्या प्रत्ययश्च" इति।

अपभ्रंशानां साक्षादवाचकत्वे दृष्टान्तम्-

"अम्बाम्बेति यदा बालः शिक्षमाणः प्रभाषते।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः"[12]।। इति

यदा माता वाग्व्यवहारमधिगम्यमानं स्वपुत्रम् "अम्ब अम्ब" इति शिक्षयति तदा सः बालः अम्ब इति वक्तुं यतमानोऽपि अशक्त्या 'मम्म' इति अव्यक्तं वक्ति। ततश्च शब्दविदः श्रोतारः बालोक्तस्य अव्यक्तस्य "मम्मम" इत्यस्य प्रकृतिं व्यक्तं शब्दमवधारयन्ति। "अम्बाम्बेति" इत्यस्मिन् स्थाने "अम्व्वम्ब्विति, अम्मामम्मेति, बम्बम्बेति" इत्यादयः नैके पाठभेदाः वर्तन्ते। इह "अम्बाम्बेति" इति साधुः पाठः। एवम् अपभ्रंशानां वाचकत्वाचकत्वे दृष्टान्तं प्रदर्श्य दार्ष्टान्तिकमुदाह्रियते। तथा च कारिका-

"एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते"[13]।। इति

एवं पूर्वोक्तरीत्या बालाम्बवत् प्रयुक्तुमिष्टे प्रौढैरपि स्त्रीशूद्रादिभिः वा अशक्त्या प्रमादाद्वा अपभ्रंशाः प्रयुज्यन्ते। तै अपभ्रंशैः साधुशब्दव्यवहितः कश्चिदर्थो अभिधीयते, न तु

साक्षादर्थबोधः। संकीर्णायां वाचि कालक्रमेण साधुशब्दविषये अपभ्रंशाः प्रयुज्यन्ते। संकीर्णा हि साध्वी वागपभ्रंशैः। तत्र यदि कश्चिदपभ्रंशं प्रयुङ्क्ते, तदा शिष्टाः लक्षणविदः वैयाकरणाः अपभ्रंशैः साधुन् प्रतिपादयन्ति। यथा धूमेन लिङ्गेन वह्निरनुमीयते, तथैवापभ्रंशेन लिङ्गेन साधुरनुमीयते। शास्त्रीयानुमानं तावत्– पर्वतो वह्निमान् धूमवत्त्वात् महानसवत्, तथैव इदं श्रुतं वाक्यं साधुशब्दवत्, अपभ्रंशसत्त्वात्, बालाम्बवत्।

ननु एवं तर्हि साधुशब्दमजानतां स्त्रीशूद्रचाण्डालादीनां बोध न भवेत् यतो हि तेषाम् असाधुशब्दशब्दश्रवणेन साधुशब्दस्मरणासंभावादतः प्राह भर्तृहरिः–

"पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु।
प्रसिद्धिमागता येषु तेषां साधुरवाचकः"[14]।। इति

गुणहीनेषु अभिधातृषु, तेषां समाजे परम्परावशात् अपभ्रंशाः प्रसिद्धं प्राप्ताः। तेषाम् अभिधातृणां साधुशब्दोऽपि अवाचकः। यतो हि गुणहीनाः जनाः साधुशब्देभ्यो असाधुशब्दान् अनुमीयन्ते। ततश्च तैः अपभ्रंशेभ्यो अर्थबोधः क्रियते। स्त्रीशूद्रचाण्डालादिभिः अभ्यासात् अपभ्रंशाः प्रयुज्यन्ते, तथा साधुविषये प्रमाद्यत्सु वक्तृषु एवंभूता अपभ्रंशाः परम्परादीर्घतया बहुकालपर्यन्तं प्रयुज्यमानाः रूढितामुपगता प्रचलिता भवन्ति। येन तैरेव प्रसिद्धतरो व्यवहारो जायते। कस्यचित् साधुशब्दप्रयोगे संशये सति सम्प्रति अपभ्रंशेन अर्थनिर्णयः क्रियते। ते तमेव असाधुशब्दं प्रत्यक्षपक्षे साक्षात् वाचकत्वं मन्वते। साधुशब्दं चानुमानपक्षे व्यवस्थापयन्ति। श्रीवृषभाचार्यः कथयति– "तमेव च इति । तेषां साधुरवाचक इति व्याचष्टे" ।

अपभ्रंशानां शब्दप्रकृतिकत्वम्–

"दैवी वाग् व्यवकीर्णेयमशक्तैरभिधातृभिः।
अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्ययः"[15]।। इति

कारिकार्थस्तु- इयं देवस्वरूपिणी संस्कृताभिधा दैवी वाक् असमर्थैः वक्तृभिः असाधुशब्दैः व्यवकीर्णा मिश्रीकृता वेति। अस्मिन् साध्वसाधुर्वादे शब्दानित्यदर्शिनां तार्किकानां "इयं संस्कृताभिधा वाक् दैवी वाक्" इत्यस्मिन् सिद्धान्ते बुद्धिवैपरीत्यम्। अस्याः वाचः सङ्कीर्णतां प्रति द्विविधा मतिं मतञ्च प्रदर्शयति– तत्र पूर्वमुक्तं यत्

वक्तृणामसामर्थात् इयं वाक् सङ्कीर्णा, अपरञ्च साधुशब्दप्रयोगैः सह नैके अपभ्रंशाः सम्मिश्रीताः। अतएव अपभ्रंशानां प्रयोगः बहुत्र दरीदृश्यते।

संस्कृतं नाम दैवी वाक्, देवसम्बन्धिनी इयं वाणी। अस्याः देववाणी, दैवीवाक्, गीर्वाणवाणी, सुरभारतीत्यादयः पर्यायवाचिनः सन्ति। पुराकाल्पे श्रुयते यत् मनुष्याणां वाणी सर्वैरपभ्रंशैरसंकीर्णा आसीत्। अनया एव भाषया भगवती श्रुतिरपि प्रकटिता। इयं वाक् अनादि-अकृत्रिम-अनन्तरूपा। उक्तञ्च महाकविना व्यासेन–

"अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः"[16]।। इति

परन्तु केचन शब्दानित्यवादिनः इत्थं न मन्यन्ते। तेषां नये तु साधुशब्दाः पूर्वं नासन्, न च तेषां धर्मसाधनम्। परन्तु अपभ्रंशाः प्रागासन्, अपि च अपभ्रंशाः व्याकरणेन संस्कृताः साधवः सञ्जाताः। तस्मात् एव साधुशब्दानां संस्कृतमिति संज्ञा न तु तेषां दैवीवाचत्वम्।

साध्वसाधूनां वाचकत्वम्–

"उभयेषामविच्छेदात् अन्यशब्दविवक्षया।
योऽन्यः प्रयुज्यते शब्दो न सोऽर्थस्याभिधायकः"[17]।। इति

उभयेषामपि अविच्छेदाद् अन्यशब्दविवक्षया य अन्यः शब्दः प्रयुज्यते, स अर्थस्य अभिधायकः न भवतीति कारिकार्थः।

वस्तुतस्तु साध्वसाधूणामस्ति कश्चिद् अविच्छेदसम्बन्धः, न तु परस्परं प्रकृतिविकृतिभावः। यथा घट इति प्रयोक्तव्ये पट इति प्रयुक्ते सति न कस्यापि घटरूपार्थप्रतिपत्तिर्भवति। एवञ्च शिष्टैरपि यथा साधुशब्दाः प्रयुज्यन्ते तथैव अपभ्रंशाऽपि। अतः साधुशब्दानामिव अपभ्रंशानामपि वाचकत्वं स्वीकर्तव्यम्।

निष्कर्षः– इत्थं च अपभ्रंशानां वाचकत्वे साधुत्वनिराकरणे च शास्त्रकाराः विवदन्ते। तेषु वैयाकरणैः अपभ्रंशानां वाचकत्वम् अङ्गीक्रियन्ते। एवं हि साधुशब्दानाम् अपभ्रंशानां च वाचकत्वे तुल्येऽपि शास्त्रेण साधुशब्दापशब्दप्रयोगेषु पुण्यपापयोः नियमः विधीयते। तत्र साधुशब्दप्रयोगे पुण्यम्, अपभ्रंशप्रयोगे तु पापं पुण्याभाव इति।

अत साधुशब्दा एव प्रयोक्तव्या नासाधव इति शम्।

## सन्दर्भाः-

1. वैयाकरणभूषणसारः ,कारिका ३८।
2. वाक्यपदीयम् १।१
3. वाक्यपदीयम् १।१४६
4. वाक्यपदीयम् १।१४
5. महाभाष्ये पस्पशाह्निकम्।
6. वाक्यपदीयम् १।१४७
7. वाक्यपदीयम् १।१४८
8. पस्पशाह्निकम्।
9. पस्पशाह्निकम्
10. वाक्यपदीयम् १।१४९
11. वाक्यपदीयम् १।१५०
12. वाक्यपदीयम् १।१५१५२
13. वाक्यपदीयम् १।१५२
14. वाक्यपदीयम् १।१५३
15. वाक्यपदीयम् १।१५४
16. महाभारतम्,शा० प० २३१।५६
17. वाक्यपदीयम् १।१५५

## सन्दर्भग्रन्थसूची


- भर्तृहरिः, वाक्यपदीयम्(ब्रह्मकाण्डम्), सूर्यनारायण शुक्ल, रामगोविन्द शुक्ल(सम्पादकौ), चौखाम्बा संस्कृत संस्थान, वाराणसी, २०१६।
- भर्तृहरिः, वाक्यपदीयम्(प्रथमो भागः, ब्रह्मकाण्डम्, व्याख्याद्वयोपेतम्), 'पद्मश्री' पण्डितश्रीरघुनाथशर्मा, (अम्बाकर्त्रीव्याख्याकारः सम्पा०), संपूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी, २००६।
- भर्तृहरिः, वाक्यपदीयम्(ब्रह्मकाण्डम्), आचार्य पं सत्यनारायण खण्डूडी(सम्पा०), चौखाम्बा कृष्णदास अकादमी, वाराणसी, २०१४।
- भर्तृहरिः, वाक्यपदीयम्(प्रथमं ब्रह्मकाण्डम्), डा० शिवशङ्कर अवस्थी(विवरणकार), चौखाम्बा

विद्याभवन, वाराणसी, २००६।

- भर्तृहरिः, वाक्यपदीयम्(ब्रह्मकाण्डम्), संस्कृत-आङ्ल-हिन्दी-भाषाटीकोपेतम्, वाचस्पतिः सत्यकामः वर्मा(टीकाकारः), मुंशीराम मनोहरलाल, नई दिल्ली।
- पतञ्जलिः, व्याकरण-महाभाष्यम्, प्रो० जयशङ्करलाल त्रिपाठी(व्याख्याकारः), चौखाम्बा कृष्णदास अकादमी, वाराणसी, २०१७।
- व्याकरणसिद्धान्त-सुधानिधिमर्मप्रकाशः, डा०-पङ्कजकुमार-व्यासः(सम्पादकः), राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपतिः-आन्ध्रप्रदेशः, २०११।
- युधिष्ठिरमीमांसकः, संस्कृत व्याकरणशास्त्र का इतिहास, भारतीय प्राच्यविद्या प्रतिष्ठान, काशी २०३०।
- Tatacharya N.S. Ramanuja, Sabdabodhamimamsa, (Part III – Case Terminations and Their Significance), Institute Francais De Pondicherry & Rashtriya Sanskrit Sansthan, 2008.
- कौण्डभट्टः, वैयाकरणभूषणसारः(श्रीहरिवल्लभकृत दर्पण-व्याखा संवलितः तथैव सुबोधिनी हिन्दीव्याख्योपेतश्च), डाँ चन्द्रिकाप्रसाद द्विवेदी(हिन्दीव्याख्याकारः), चौखाम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१८।
- भर्तृहरिः, महाभाष्यदीपिका, जोहनेश ब्रोन्क् होर्श्ट, भण्डार्कर ओरियन्टल् रिसर्च् इन्स्टिट्यूट्, पूणे, १९८७।
- नागेशभट्टः, परमलघुमञ्जूषा(भावप्रकाशिका बालबोधिनी संस्कृत-हिन्दी-व्याख्योपेता), डा० जयशङ्करलाल त्रिपाठी(व्याखाकारः सम्पादकश्च), चोखम्बा कृष्णदास अकादमी, वाराणसी, २०१७।

❋ ❋ ❋